बृहस्पतिस्तु पप्रच्छ ब्रह्माणं काविमाविति। भवन्तं नोपतिष्ठेते तौ नः शंस पितामह!” ब्रह्मोवाच “यावेतौ पृथिवीं द्याञ्च भासयन्तौ तपस्विनौ। ज्वलन्तौ रोचमानौ च व्याप्यातीतौ महाबलौ। नरनारायणावेतौ लोकाल्लोकं समास्थितौ। ऊर्जितौ स्वेन तपसा महासत्वपराक्रमौ। एतौ हि कर्मणा लोकं नन्दयामासतुर्ध्रुवम्। द्विधा भूतौ महाप्राज्ञौ विद्धि ब्रह्मन् परन्तपौ। असुराणां विनाशाय देवगन्धर्वपूजितौ” वैशम्पायन उवाच “जगाम शक्रस्तच्छ्रुत्वा यत्र तौ तेपतुस्तपः। सार्द्धं देवगणैः सर्वैर्बृहस्पतिपुरोगमैः। तदा देवासुरे युद्धे भये जाते दिवौकसाम्। अयाचत महात्मानौ नरनारायणौ वरम्। तावब्रूतां वृणीष्वेति तदा भरतसत्तम!। अथ तावब्रवीच्छक्रः सह्यं नः क्रियतामिति। ततस्तौ शक्रमब्रूतां करिष्यावो यदिच्छसि। ताभ्याञ्च सहितः शक्रो विजिग्ये दैत्यदानवान्। नर इन्द्रस्य संग्रामे हत्वा शत्रून् परन्तपः। पौलोमान् कालकञ्जांश्च सहस्राणि शतानि च। एवमेतौ महावीर्यौ तौ पश्यत समागतौ। वासुदेवार्जुनौ वीरौ समवेतौ महारथौ। नरनारायणौ देवौ पूर्वदेवाविति श्रुतिः। अजेयौ मानुषे लोके सेन्द्रैरपि सुरासुरैः। एष नारायणः कृष्णः फाल्गुनश्च नरः स्मृतः। नारायणो नरश्चैव सत्वमेकं द्विधा कृतम्। एतौ हि कर्मणा लोकानश्नुवातेऽक्षयान् ध्रुवान्” भा० उ० ४८अ०। ७धान्यकर्पूरभेदे मेदि०। ८शङ्कौ छायाव्यवहारोपयोगिकीलकभेदे “छायाहृते तु नरदीपतलान्तरघ्ने शङ्कौ भवेन्नरयुते खलु दीपकोच्चम्” लीला०। छायाव्यवहारशब्दे दृश्यम् लीला० उक्ते रत्नमिश्रव्यवहारे ९रत्नमिश्रणकारिनरसङ्ख्यायाञ्च “नरघ्नदानोनितरत्नशेषैरिष्टे हृते स्युः खलु मौल्यसङ्ख्याः” लीला०। नरत्वस्य दुर्लभता विष्णुपु० उक्ता नरकभोगोत्तरं तत्तद्योनिभ्रमणानन्तरं सप्रपञ्चं पुराणस० दर्शिता यथा

“पापेन हि ध्रुवं यान्ति नरकेषु नराः स्वयम्। यः करोति नरः पापं तस्यात्मा ध्रुवमप्रियः। पापस्य हि फलं दुःखं तद्भोक्तव्यमिहात्मना। कथं ते पापनिरता नरा रात्रिषु शेरते। मरणान्तरिते येषां नरके तीव्रयातनाः। एवं क्लिष्टा विशुद्धाश्च सावशेषेण कर्मणा। ततः क्षितिं समासाद्य पुनर्जायन्ति देहिनः। स्थावरा विविधाकारास्तृणगुल्मादिभेदतः। तत्रानुभूय दुःखानि जायन्ते कीटयोनिषु। निष्क्रान्ताः कीटयोनिभ्यस्ततो जायन्ति पक्षिणः। संक्षिप्ता, पक्षिभावेन भवन्ति तृणजातिषु। मार्गदुःखमतिक्रम्य जायन्ते पशुयोनिषु। क्रमाद्गोयोनिमासाद्य पुनर्जायन्ति मानुषाः। एवं योनिषु सर्वासु परिभ्रम्य क्रमेण तु। कालान्तरवशायान्ति मानुष्यमतिदुर्लभम्। व्युत्क्रमेणापि मानुष्यं प्राप्यते पुण्यगौरवात्। विचित्रा गतयः प्रोक्ताः कर्मणां गुरुलाघवात्। मानुष्यं यः समासाद्य स्वर्गमोक्षप्रसाधकम्। द्वयोर्न साधयत्येकं स मृतस्तप्यते चिरम्। देवासुराणां सर्वेषां मानुष्यमतिदुर्लभम्। तत् संप्राप्य तथा कुर्य्यात् न गच्छेन्नरकं यथा। स्वर्गापवर्गलाभाय यदि नास्ति समुद्यमः। सर्वस्य मूलं मानुष्यं तद्यत्नादनुपालय। धर्म्ममूलेन मानुष्यं लब्ध्वा सर्वार्थसाधकम्। मानुषत्वे च विप्रत्वं यदि प्राप्नोति दुर्लभम्। न करोत्यात्मनः श्रेयः कोऽन्योऽस्मादस्त्यचेतनः”।

“नरत्वं दुर्लभं लोके विद्या तत्र सुदुर्लभा” सा०द०अग्निपु०

**नरक** पु० नरति नयति पापिलोकं शापानुरूपभोगायात्र नृ—नये आधारे बा० वुन्। पापभोगस्थाने तस्य तथात्वञ्च विस्तरेण विष्णुपु०शिवधर्मोत्तरे च वर्णितं तदेव पुराणस० प्रदर्शितं तच्च कर्मविपाकशब्दे १७४५ पृष्ठादौ दर्शितम्। पापभेदेन नरकभेदप्राप्तिश्च पाद्मे उत्त०ख० ४८अ० यथा “कूटसाक्षी तथाऽसम्यक् पक्षपातेन यो वदेत्। यश्चान्यदनृतं वक्ति स नरो याति रौरवम्। भ्रूणहा पुरहर्त्ता च गोघ्नश्च मुनिसत्तमः!। यान्ति ते नरके रोधे यश्चोच्छ्वासनिरोधकः। सुरापो ब्रह्महा हर्त्ता सुवर्णस्य च शूकरे। प्रयाति नरके यश्च तैः संसर्गमुपैति वै। राजन्यवैश्यहा तात! तथैव गुरुतल्पगः। तप्तकुम्भे स्वसृगामी हन्ति राजभटांश्च यः। माध्वीविक्रयकृद्बध्यपालः केशरिविक्रयी। तप्तलौहे तु पच्यन्ते यश्च भक्तं परित्यजेत्”। (केशरी अश्वः) “स्नुषां सुताञ्चापि गत्वा महाज्वाले निपात्यते। अवमन्ता गुरूणां यो यश्चाक्रोष्टा नराधमः। वेददूषयिता यश्च वेदविक्रायकश्च यः। अगम्यागामी यश्च स्यात्ते यान्त्यसिवनं द्विज। चौरो विमोहे पतति मर्य्यादादूषकस्तथा। देवद्विजपितॄन् द्वेष्टा रत्नदूषयिता च यः। स याति कृमिभक्षे वै कृमीशे च दुरिष्टकृत्। पितृदेवातिथीन् यस्तु पर्य्यश्नाति नराधमः। लालाभक्षे स यात्युग्रे शरकर्त्ता च रोधके। (पर्य्यश्नाति परित्यज्य आदौ भुङ्क्ते) “करोति कर्णिनो